S.C

SEAT No.________ No. of Printed Pages ; 3

[A-12]

**SARDAR PATEL UNIVERSITY**

**S.Y B.A. EXAMINATION EXTERNAL**

**SUBJECT TITLE:** अभिज्ञान शाकुन्तलम् शतबोधशतकम्।

**Subject Code: SAN 203** **PAPER NO: SAN 203**

**Date: 08-05- 2018**

**Time :02:00TO 05:00 p.m.** **Total Marks : 100**

**Name of Paper:** अभिज्ञान शाकुन्तलम् शतबोधशतकम्।

પ્રશ્ન-૧ નીચેનામાંથી કોઇપણ 3 શ્લોકોનો અનુવાદ કરો? (૧૫)

१ ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम्।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति।।

२ -अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम् ।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः।।

३- अन्तर्हिते शशिनि सैव कुमुद्वती मे
दृष्टिं न नन्दयति संस्मरणीयशोभा।
इष्टप्रवासजनितान्यबलाजनस्य
दुःखानि नूनमतिमात्र सुदुःसहानि।।

४- रम्यान्तरःकमलिनीहरितैः सरोभि-
श्छायाद्रुमैर्नियमितार्कमयूखतापः ।
भूयात्कुशेशयरजोमृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः।।

५- प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तोये काञ्चनपद्मरेणुकपिशे धर्माभिषेकक्रिया।
ध्यानं रत्नशिलातलेषु विबुधस्त्रीसंनिधौ संयमो
यत्काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी ।।

(પાન ઉથલાવો)

અથવા

પ્રશ્ન-૧-નીચેનામાંથી કોઇપણ 3 સંદર્ભ સમજાવો? (૧૫)

१- जृम्भस्व सिंह दन्तांस्ते गणयिष्ये ।

२- उत्सवप्रिया खलु मनुष्याः।

३- अनिर्वर्णनीया परकलत्रम।

४- शिवास्ते पन्थानः सन्तु ।

५- पौरव, रक्षाविनयम् ।

પ્રશ્ન-૨ કાલિદાસનું જીવન, સમય અને કવન વર્ણવો. (૨૦)

અથવા

અભિજ્ઞાન શાકુન્તલ નાટકનો કથાસાર વર્ણવો.

પ્રશ્ન-૩ કાલિદાસની નાટયકલા વર્ણવો. (૨૦)

અથવા

કાલિદાસનું પ્રકૃતિ નિરૂપણ કરો.

પ્રશ્ન-૪ નીચેનામાંથી કોઇપણ 3 શ્લોકોનો અનુવાદ કરો? (૧૫)

१ लभेत सिकतासु तैलमपि यत्नतः पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः।
कदाचिदपि पर्यटन् शशविषाणमासादये-
न्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्।।

२ - दाक्षिण्यं स्वजने दया परजने शाठ्यं सदा दुर्जने
प्रीतिः साधुजने नयो नृपजने विद्वज्जनेष्वार्जवम् ।
शौर्यं शत्रुजने क्षमा गुरुजने नारीजने धूर्तता
ये चैव पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः ।

३- पापान् निवारयति योजयते हिताय
गुह्यं च गूहति गुणान् प्रकटीकरोति।

आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तं।।

४- वहति भुवनश्रेणी शेषः फणाफलकस्थितां
कमठपतिना मध्येपृष्ठं सदा च धार्यते ।
तमपि कुरुते कोडाधीनं पयोधिरनादरा-
दहह महतां निःसीमानश्चरित्रविभूतयः ।।

५-यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं
तत्प्राप्नोति मरुस्थलेऽपि नितरां मेरौ ततो नाधिकम् ।
तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः
कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम् ।।

અથવા

નીચેનામાંથી કોઈપણ 3 સંદર્ભ સમજાવો? (૧૫)

१ विद्याविहिनः पशुः ।।
२ सेवाधर्मः परमगहनो योगिनामप्यगम्यः ।।
३ विवेकभ्रष्टानां भवति विनिपाताशतमुखः
४ मूर्खस्य नास्त्यौषधम
५ वाग्भूषणं भूषणम

પ્રશ્ન ૫ ભર્તૃહરિનું જીવન, સમય અને કવન વર્ણવો. (૨૦)

અથવા

મુક્તકની વ્યાખ્યા આપી, નીતિશતકનું મુક્તકકાવ્ય તરીકે મૂલ્યાંકન કરો.

પ્રશ્ન ૬ નીચેનામાંથી કોઈપણ એક ટૂંકનોંધ લખો. (૧૦)

૧. દુર્જન નિંદા.

૨. વિદ્યાનું મહત્વ.

——— x ———